# Shri Krishnakritam Suryashtottarashata Stotramstotram

# શ્રીકૃષ્ણકૃતં સૂર્યાષ્ટોત્તરશતસ્તોત્રમ્સ્તોત્રમ્

## Document Information

Text title : Shri Krishnakritam Suryashtottarashatanama Stotram 6

File name : kRRiShNakRRitaMsUryAShTottarashatanAmastotram.itx

Category : navagraha, skandapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | AvantyakhaNDa | adhyAya 33/2-15||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# શ્રીકૃષ્ણકૃતં સૂર્યાષ્ટોત્તરશતસ્તોત્રમ્સ્તોત્રમ્

શ્રીકૃષ્ણ ઉવાચ ।
આદિત્યં ભાસ્કરં ભાનું રવિં સૂર્યં દિવાકરમ્ ।
દિવાકરં દિવાનાથં તપનં તપતાં વરમ્ ॥ ૨॥

વરેણ્યં વરદં વિષ્ણુમનઘં વાસવાનુજમ્ ।
બલવીર્યં સહસ્રાંશું સહસ્રકિરણદ્યુતિમ્ ॥ ૩॥

મયૂખમાલિનં વિશ્વં માર્તણ્ડં ચણ્ડરોચિષમ્ ।
સદાતીતં સુભાસ્વન્તં સપ્તસપ્તિં સુખોદયમ્ ॥ ૪॥

દેવદેવમહિર્બુધ્ન્યં ધામ્નાં નિધિમનુત્તમમ્ ।
તપોબ્રહ્મમયાલોકં લોકપાલમપામ્પતિમ્ ॥ ૫॥

જગત્પ્રબોધજનકં જગદ્બીજં જગત્પ્રભુમ્ ।
અર્કં નિઃશ્રેયસપરં કારણં શ્રેયસાં પરમ્ ॥ ૬॥

ઇનં પ્રભાવિણં પુણ્યં પતઙ્ગં પ્લવગેશ્વરમ્ ।
દાતારં વાઞ્છિતાર્થાનાં દૃષ્ટાદૃષ્ટફલપ્રદમ્ ॥ ૭॥

ગૃહં ગૃહકરં હંસં હરિદશ્વં હુતાશનમ્ ।
મઙ્ગલ્યં મઙ્ગલં ગેયં ધ્રુવં ધર્મપ્રબોધનમ્ ॥ ૮॥

ભવસમ્ભાવિતભાવં ભૂતભવ્યભવાત્મકમ્ ।
દુર્ગમં દુર્ગતિહરં હરનેત્રં ત્રયીમયમ્ ॥ ૯॥

ત્રૈલોક્યતિલકં તીર્થં તરણિં સર્વતોમુખમ્ ।
તેજોરાશિસુનિર્વાણં વિશ્વેશં ધામ સામ્પ્રતમ્ ॥ ૧.૩૩.૧૦॥

કલ્પં કલ્પાનલં કાલં કાલચક્રં ક્રતુપ્રિયમ્ ।
ભૂષણં મરુતં સૂર્યં મણિરત્નં સુલોચનમ્ ॥ ૧૧॥

ત્વષ્ટારં વિષ્ટરં વિશ્વં સદસત્કર્મસાક્ષિકમ્ ।

સવિતારં સહસ્રાક્ષં પ્રજાપાલમધોક્ષજમ્ ॥ ૧૨॥

બ્રહ્માણં વાસરારમ્ભે રક્તવર્ણં મહાદ્યુતિમ્ ।
શુક્લં મધ્યન્દિને રુદ્રં શ્યામં વિષ્ણું દિનક્ષયે ॥ ૧૩॥

નામ્નામષ્ટશતં દિવ્યં વિષ્ણુના સમુદાહૃતમ્ ।
ય ઇદં પ્રયતો ભૂત્વા પઠેદ્ભક્ત્યા સમાહિતઃ ॥ ૧૪॥

ન તસ્ય વિપદઃ ક્વાપિ સર્વત્રાપિ શુભા ગતિઃ ।
ધનધાન્યસુખાવાપ્તિઃ પુત્રલાભશ્ચ જાયતે ॥ ૧૫॥

તેજઃ પ્રજ્ઞાં પરં લાભં જ્ઞાનં ચ લભતે ગતિમ્ ॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે અવન્તીક્ષેત્રમાહાત્મ્યે
ત્રયસ્ત્રિંશાધ્યાયાન્તર્ગતં શ્રીકૃષ્ણકૃતં સૂર્યાષ્ટોત્તરસતામ-
સ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । આવન્ત્યખણ્ડ । અધ્યાય ૩૩/૨-૧૫॥

skandapurANa . AvantyakhaNDa . AvantyakhaNDa . adhyAya 33/2-15..

Proofread by PSA Easwaran

*Shri Krishnakritam Suryashtottarashata Stotramstotram*
pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*